# नारिकेल

……………………………नारिकेलफलानि च।
बृंहणस्निग्धशीतानि बाल्यानि मधुराणि च।। (चरक, सू २७-१२४)
Narikela phala is madhura in rasa, snigdha in guna, sita in veerya, brmhana and balya.

नारिकेलं गुरु स्निग्धं पित्तघ्नं स्वादु शीतलम्।
बलमांसप्रदं हृद्यं बृंहणं बस्तिशोधनम्।। (सुश्रुत, सू ४६-२८०)

Narikela is svadu in rasa, guru, snigdha in guna, sita in veerya, alleviates pitta, bala mamsa prada, hrdya, brmhana and vasti sodhana.

नारिकेली गुरुः स्निग्धः शीतः पित्तावनाशनः।

अर्धपक्वः तृषाशोषशमनो दुर्जरः परः।।

नारिकेलसलिलं लघु बल्यं शीतलं च मधुरं गुरु पाके।
पित्तपीनसतृषाश्रमदाहशान्तिशोषशमनं सुखदायि।।

पक्वनेतदपि किञ्चिदिहोक्तं पित्तकारि रुचिदं तुवदन्ति।।

नालिकेरोद्भवं तैलं बृहणं बलवर्धनम्।
केश्यं पित्तानिलहरं मधुरं रसपाकयोः।।

हृद्यं रुच्यं नवं प्रोक्तं, पुराणं गुरु वातनुत्।
तिक्तं सुहृद्यं मधुरं कण्डूकुष्ठहरं परम्।।
स्वादु पाकरसं रक्तपित्तघ्नं कफनाशनम्।

दुग्धं तु मृत्तिकाभांडे नालिकेर भवं क्षिपेत्।।
मुखं पिधाय वस्त्रेण रात्रौ स्थाप्यं गृहाद् बहिः।
प्रातःकाले तु निर्मथ्य नवनीतं तु कारयेत्।
तत् पक्त्वा तद् घृतं नाम बृंहणं बलवर्धनम्।।

शर्करा नलिकेरस्य मधुरा वातपित्तजित्।। **(Rjn)**

Narikela is guru, snigdha in guna, sita in veerya and destroys pitta.

Ardha pakva pacifies trsa and sosa, is durjara param.

Narikela salila is laghu in guna, sita in veerya, madhura in paka, guru, balya, cures pitta, pinasa, trsa, srama, daha, sosa and is sukha dayi.

Pakva narikela increases pitta and rucida.

Its taila is madhura in rasa and in paka, brmhana, bala vardhaka, kesya, alleviates pitta and anila.

Nava narikela is hrdya and rucya.

Purana narikela is madhura in rasa, guru in guna, svadu in paka, alleviates vata, rakta, pitta, destroys kapha, is tikta, suhrdya, cures kandu and kustha.

Dugdha is prepared by squeezing milk out of the fruit and this is stored in a mud pot the whole night. The next day it is churned and butter is extracted. The ghee thus prepared is brmhana and bala vardhana.

Its sarkara is madhura and alleviates vata, pitta.

नारिकेलफलं शीतं दुर्जरं बस्तिशोधनम्।
विष्टम्भि बृंहणं बल्यं वातपितास्रदाहनुत्।।

विशेषतः कामेलनालिकेरं निहन्ति पित्तज्वरपित्तदोषान्।

तदेव जीर्णं गुरु पित्तकारि विदाहि विष्टम्भिमतं भिषग्भिः।।

तस्याम्भः शीतलं हृदयं दीपनी शुक्रलं लघु।
पिपासापित्तजित् स्वादु बस्तिशुद्धिकरं परम्।।

नारिकेलस्य तालस्य खर्जूरस्य शिरीसि तु।
कषायस्निग्धमधुरबृंहणानि गुरूणि च।। **(Bpn)**

Its phala is sita in veerya, durjara, basti sodhana, vistambhi, brmhana, balya, alleviates vata, pitta, asra and daha.

Komala narikela cures pittajvara and pitta dosha.

Jirna phala is guru in guna, increases pitta, is vidahi and vistambhi.

Its ambu is svadu in rasa, laghu in guna, sita in veerya, hrdya, dipani, sukrala, basti suddhikara para, alleviates pippasa and pitta.

Its tala is kashaya, madhura in rasa, snigdha, guru in guna and brmhana.

नारिकेलफलं शुष्कं दुर्जरं दाहकं गुरु।
स्निग्धं मलस्तम्भकरं बलवीर्यरुचिप्रदम्।। **(Nir)**

Suska phala is guru, snigdha in guna, durjara, causes daha, mala stambha, is bala veerya ruci prada.

नारिकेल-प्रसूनं तु रक्तपित्तप्रेमहनुत्।
रक्ततिसारं हरति महालोतनाशनम्//
शीतलं सोमरोगघ्नं विबन्धं कुरुते भृशम्।। **(Kyn)**

Young narikela fruits are sita in virya, alleviate raktapitta, prameha, rakta atisara... soma roga, causes vibandha.

तस्याम्भः शीतलं हृद्यं दीपनं शुक्रलं लघु।
तत्पादशुरोमज्जा शुक्रला वातपित्तजित्।। **(यो.र)**

Its Ambu is Sita in virya, Hrdya, Dipana, sukrala, Laghu.

Its Majja is Sukrala and Vata pitta hara.